अथ दशमस्तोत्रम

अव नः श्रीपतिरप्रतिरधिकेशादिभवादे ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १ ॥
सुरवन्ध्यादिप सद्वरभरिता शेषगुणालम ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ २ ॥
सकलध्वान्तविनाशन परमानन्द सुधाहो ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ ३ ॥
त्रिजगत्पोत सदार्चितशरणाशापतिधातो ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ ४ ॥
त्रिगुणातीतविधारक परितो देहि सुभक्तिम ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ ५ ॥
शरणं कारणाभावन भव मे तात सदा.अलम ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ ६ ॥
मरणप्राणद पालक जगदीशाव सुभक्तिम ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ ७ ॥
तरुणादित्य सवर्णकचरणाब्जामलकीर्ते ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ ८ ॥
सलिलप्रोत्थसरागकमणिवर्णोच्छनखादे ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ ९ ॥
कजतूणीनिभपावन वरज~ण्घामितशक्ते ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १० ॥

इभहस्तपरभशोभनपरमोरु स्थर(ल)माले ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ ११ ॥
असनोत्पुल्लसुपुष्पकसमवर्णावरणान्ते ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १२ ॥
शतमोदोद्भवसुन्दरि वरपद्मोत्थितनाभे ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १३ ॥
जगदागूहकपल्लवसमकुक्षे शरणादे ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १४ ॥
जगदम्बामलसुन्दरगइहवक्षोवरयोगिन ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १५ ॥
दितिजान्तप्रद चक्रधरगदायुग्वरबाहो ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १६ ॥
परमज~नानमहानिधिवदन श्रीरमणेन्दो ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १७ ॥
निखिलाघौघविनाशन परसौख्यप्रददइष्टे ।
करुणापूर्ण वरप्रद चरितं ज~नापय मे ते ॥ १८ ॥
परमानन्दसुतीर्थमुनिराजो हरिगाथाम ।
कइतवान्नित्यसुपूर्णपरमानन्दपदैषिन ॥ १९ ॥
॥इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं द्वादशस्तोत्रेषु
दशमस्तोत्रं सम्पूर्णं ॥